# महर्षिमहेशयोगीवैदिकविश्वविद्यालयस्य वैशिष्ट्यम्

महर्षिमहेशयोगीवैदिकविश्वविद्यालयस्य स्थापना प्रत्येकमानवस्य जीवने वेदविज्ञानस्य सर्वेषां चत्वारिंशत् क्षेत्राणां विधानां पूर्णफलं समाहितं कर्तुं संजाता। अस्माकं लक्ष्यम् आदर्शमानवः, समस्याविहीन रोगरहितः सुखी श्रीयुक्तश्च आदर्शसमाजं संसृज्य आदर्शभारतस्य निर्माणं, वेदभूमिः, पूर्णभूमिः भारतस्य दिव्यजागरणे समस्तविश्वस्य सुखशान्तये मार्गप्रशस्तिकरणमस्ति। तत् संक्षेपेण वदामश्चेत् अस्माकं परमलक्ष्यं 'भूतले स्वर्गः' इतिस्थापना वर्तते। वेदक्षेत्रविस्तृतं न तु परिधि आन्तिकं वर्तते। एतादृशो कोऽपि विषयो नास्ति यस्याधारः वेदः न स्यात्। सम्प्रति दृष्टिपथे समागते सम्पूर्णाधुनिकविज्ञानस्य मूलत्वेन वेदा एव सन्ति। साम्प्रतिकेऽऽधुनिकविज्ञाने परिपूर्णता भौतिकमहत्वकारणात् न दरीदृश्यते। अत्र भौतिकमेव महिमामण्डितं कृतम्। अत्र आध्यात्म आधिदैविक च शिक्षा सर्वतः तथा वारितः यथा कोऽपि मालाकारः केवलं फलेभ्यः जलोर्वरादि दद्यात् मूलंच परित्यजेत् परिणामत अत्र परिज्ञायते यत्वृक्षः अल्पकाले एव विनष्टो भविष्यति। वेदशब्द विद् ज्ञाने विद्धातोर्धञ्ि प्रत्यय कृते निष्पन्नः यो ज्ञानार्थकेति वेदविदुः। ऋग्वेद, सामवेद, यजुर्वेद, अथर्ववेदेति चत्वारः वेदाः विपुलज्ञानविज्ञानरत्नागारेति विश्वश्रुतिः। एतेषामिव शिक्षाव्याकरणछन्दनिरुक्तज्योतिषकल्पश्चेति वेदषडङ्गानि अखिलविश्वे सर्वमान्यमहत्तावैशिष्टं च भजन्तो। वस्तुतः परमपूज्यः महर्षिमहेशयोगीवर्यस्तु वैदिकवाङ्मयस्य चत्वारिंशत् क्षेत्राणां वेदाङ्गानि सहितं सार्वभौमिकमहत्तां परिप्रकटयत्। तेषां मतानुसारं सम्पूर्णवैदिकवाङ्मयं ज्ञानविज्ञानस्य अतुलनिधिः वर्तते। अतः भारतीयसनातनसंस्कृतिसभ्यताया हिन्दूधर्मश्च मूलं वर्तते। 'वेदोऽखिलो धर्ममूलमिति' स्मृतिविचारम् अनुसृत्य महर्षिवर्य अवदत्यत् 'छिन्ने मूले नैव शाखा न पत्रं'। अत एव अस्य वेदवेदाङ्गवटवृक्षस्य परिपोषणाय पूज्यमहर्षिद्वारा 'यज्ञं भुवनस्य नाभिः' इति वेदसिद्धान्तं परिपाल्य वैदिकयज्ञानाम् अनुष्ठानं विश्वकल्याणाय नितरां हितकरं शुभकरं मङ्गलकरं च उद्घोषितिम्। तदारभ्य पूज्यमहर्षिवयार्णां दैवीयनिर्देशने 'सर्वजनहिताय सर्वजनसुखायः' पञ्चविधयज्ञैः सह विभिन्नयज्ञानि प्रवर्तमानानि सन्ति। तेषां महर्षिवयार्णां विश्वकल्याणस्य संकल्पं परिपोषणाय, विस्ताराय, सतत्सातित्याय च वयं इमां राष्ट्रियवैदिकशोधसङ्गोष्ठीं आयोजयिष्यामः। भो मान्याः विद्वांसः! आगम्यन्ताम् अस्यां वैदिकयज्ञविज्ञानराष्ट्रियशोधसङ्गोष्ठ्यां तथा अन्वेषयन्तु वैदिकवाङ्मयोदधितः यज्ञविज्ञानानुसन्धानरत्नानि च। मित्राणि! अत्र आगत्य विश्वशान्तिस्थापनाय अस्यां वैदिकयज्ञविज्ञानशोधसङ्गोष्ठीं स्वलोककल्याणाय च हविं दत्वा ''मा कश्चित्दुःख भाग् भवेत्'' इति सिद्धांतं विश्वपटले दैदीप्यन्तु।

संरक्षकः

**ब्रह्मचारी डॉ. गिरीशवर्यः -कुलाधिपतिः**

अध्यक्षः

**प्रो. भुवनेशशर्मा - कुलपतिः**

प्रशासनिक समन्वयकः

**श्री अरविन्दसिंह राजपूतः-कुलसचिवः**

मुख्य-अतिथिः

**प्रो. कमलनयनशुक्लः**

आचार्योऽध्यक्षश्च संस्कृत विभागः रा.दु. वि.वि. जबलपुरम् (म.प्र.)

विशिष्ट-अतिथिः

**डॉ. नारायण होसमने**

निदेशकः - राजस्थान मन्त्र प्रतिष्ठानम्

आचार्योऽध्यक्षश्च

वेद विभागः, ज.रा. राजस्थान, सं.वि.वि. जयपुरम् (राजस्थानम्)

सारस्वत-अतिथिः

**प्रो. वेद प्रकाश मिश्रः**

आचार्योऽध्यक्षश्च संस्कृत विभागः

डॉ. सी. वी. रमन विश्वविद्यालयः, कोटा, बिलासपुरम् (छ.ग.)

संगोष्ठी सचिवः संयोजकश्च

**डॉ. उमाशंकर तिवारी**

आचार्योऽध्यक्षश्च

वेदयज्ञानुष्ठानविभागौ

दूरभाषसंकेतः - 9981994424, 9630886767, 6260470930

**Email – dr.ustiwari10@yahoo.in**

## उपशीर्षकाः

- शुक्लयजुर्वेदे प्रतिपादितं यज्ञविज्ञानम्।
- ऐतरेयब्राह्मणे प्रतिपादितं यज्ञविज्ञानम्।
- इष्टिकानिर्माणे यज्ञविज्ञानम्।
- श्रीमद्भगवद्गीतायां प्रतिपादितं यज्ञविज्ञानम्।
- विभिन्नमहाकाव्येषु प्रतिपादितं यज्ञविज्ञानम्।
- ब्राह्मणग्रन्थेषु प्रतिपादितं यज्ञविज्ञानम्।
- अथर्ववेदे प्रतिपादितं यज्ञविज्ञानम्।
- शतपथब्राह्मणे प्रतिपादितं यज्ञविज्ञानम्।
- श्रीमद्भागवते प्रतिपादितं यज्ञविज्ञानम्।
- श्रीमद्वाल्मीकिरामायणे प्रतिपादितं यज्ञविज्ञानम्।
- कथासाहित्ये प्रतिपादितं यज्ञविज्ञानम्।
- वेदाङ्गेषु प्रतिपादितं यज्ञविज्ञानम्।

मान्याः सुहृदो विद्वांसः

अत्र भवतः संसूचयन्नहं हर्षातिरेकमनुभवामि यद् वेदयज्ञानुष्ठानविभागौ महर्षिमहेशयोगीवैदिक विश्वविद्यालय-पक्षतः 27 जून 2019 तिथौ "वैदिकयज्ञविज्ञानमिति"विषयमधिकृत्य एकदिवसीय राष्ट्रियवैदिकशोधसङ्गोष्ठी समायोजयिष्येते। शोधसङ्गोष्ठ्यामस्यां भवन्तः सहयोगिभिः शोधच्छात्रैश्च सह समामन्त्रिताः वर्तन्ते। प्रार्थनया भवन्तः समुपकल्पितायाः राष्ट्रियवैदिकशोधसङ्गोष्ठ्याः वैशिष्ट्यं प्रातिष्ठ्यश्चानुभवन्तः शोधसङ्गोष्ठीसाफल्यं विधास्यन्तीति अस्माकं परमसौभग्यं शोधसङ्गोष्ठीविवरण पञ्जीकरण-प्रपत्रश्चानेनैव निमन्त्रणपत्रेण सह संलग्नम् अस्ति। एतदनुसारं भवतां प्रतिष्ठा एवं गौरवमयी आगमनस्वीकृतिः शीघ्रातिशीघ्रं प्रेषयन्तु इति सानुरोधं प्रार्थ्यन्ते ।

साभिवादनम्, जयतु गुरुदेवः, जयतु महर्षिः

भावत्कः
डॉ. उमाशंकर तिवारी
संयोजकः राष्ट्रियवैदिकशोधसङ्गोष्ठी

विषयः- "वैदिकयज्ञविज्ञानम्" 27 जून 2019
वेदयज्ञानुष्ठानविभागौः- महर्षिमहेशयोगीवैदिकविश्वविद्यालयः ब्रह्मस्थानम्, करौंदी, कटनी (म.प्र.)

## वायुमार्गः/रेलमार्गः/स्थलमार्गः

* समीपस्थवायुमार्गस्थानं डुमना जबलपुरम् वायुयानपत्तन कोलकत्ता-मुम्बई-भोपाल- इंदौर, दिल्ली इत्यादि गन्तव्यस्थलानि वायुमार्गः सम्बद्धानि वर्तन्ते।
* दिल्ली-नवदिल्ली-मुम्बई-कोलकत्ता-चेन्नई-अहमदाबाद-लखनऊ-वाराणसी- पटना गोरखपुर-अमृतसर-जम्मू-श्रीगंगानगर-बीकानेर -बड़ौदरा-मथुरा-उदयपुर-पोरबन्दर-द्वारिका-जयपुर-इन्दौर-आगरा-ग्वालियर-उज्जैनादि नगरैः सम्बद्धाः मार्गाः कटनी जाबालिपुरं नगरं प्रापयितुं क्षमाः।
* भोपालम्, इंदौर, रायपुर, प्रयागराजः, वाराणसी, विलासपुरम् च नगराणि स्थलमार्गेणः सम्बद्धानि वर्तन्ते।
* अतः सर्वे प्रतिभागिन स्वयम् आवागमनार्थमारक्षणप्रबन्धं कुर्युरिति तेभ्य एव लाभाय भवेत्। सम्मेलनस्यायोजकाः एतदर्थं नोत्तरदायिनः सन्ति।

## ब्रह्मस्थानस्य पर्यावरणम्

वेदभूमौ, पूर्णभूमौ, पुण्यभूमौ भारतवर्षे ब्रह्मस्थानस्य पर्यावरणं मनोरंजकं रमणीयं हृदयाह्लादकरंच वर्तते। अत्र सर्वे जनाः भावातीतध्यानं तथा सिद्धिं योगाभ्यासं च कुर्वन्ति। 1331 श्रोत्रियाः ब्रह्मनिष्ठाः वैदिकविश्वप्रशासकाः प्रतिदिनम् अतिरुद्रमहायज्ञं अनुष्ठीयन्ते। तेषां प्रभावेण अत्र सर्वेषां चेत्तांसि सतोगुणैः विलसन्ति।

**डॉ. उमाशंकर तिवारी**

आयोजनसचिवः संयोजकश्च

महर्षिमहेशयोगीवैदिकविश्वविद्यालयः

ब्रह्मस्थानम्, करौंदी, कटनी (म.प्र.)